

तिरुमलतिरुपतिदेवस्थानानि

# सप्तगिरिः

आध्यात्मिकसचित्रमासपत्रिका

June 2026

Rs.20/-

SAPTHAGIRI (SANSKRIT)
SPIRITUAL ILLUSTRATED MONTHLY
Volume:13 Issue: 03
June 2026, Price Rs.20/-
No. of pages-24

## अप्पलायगुण्ट श्रीप्रसन्नवेङ्कटेश्वरस्वामिनः ब्रह्मोत्सवः

(2026 जून् 24 तः जूलै 03 पर्यन्तम्)

# कार्वेटिनगरम्

## श्रीवेणुगोपालस्वामिब्रह्मोत्सवः

**05-06-2026 आरभ्य 14.06.2026 पर्यन्तम्**



| दिनाङ्कः | वासरः | प्रातः उत्सवः | रात्रौ उत्सवः |
|---|---|---|---|
| 05-06-2026 | भृगुवासरः | --- | अङ्कुरार्पणम् |
| 06-06-2026 | मन्दवासरः | ध्वजारोहणम् | महाशेषवाहनम् |
| 07-06-2026 | भानुवासरः | लघुशेषवाहनम् | हंसवाहनम् |
| 08-06-2026 | इन्दुवासरः | सिंहवाहनम् | मौक्तिकवाहनम् |
| 09-06-2026 | भौम्यवासरः | कल्पवृक्षवाहनम् | सर्वभूपालवाहनम् |
| 10-06-2026 | सौम्यवासरः | आन्दोलिकायां मोहिन्यवतारोत्सवः | गरुडवाहनम् |
| 11-06-2026 | बृहस्पतिवासरः | हनुमद्वाहनम्, सायं - वसन्तोत्सवः | गजवाहनम् |
| 12-06-2026 | भृगुवासरः | सूर्यप्रभावाहनम् | चन्द्रप्रभावाहनम् |
| 13-06-2026 | मन्दवासरः | रथोत्सवः | अश्ववाहनम् |
| 14-06-2026 | भानुवासरः | चक्रस्नानम् | ध्वजावरोहणम् |

# अप्पलायगुण्ट

## श्रीप्रसन्नवेङ्कटेश्वरस्वामिनःब्रह्मोत्सवः

**24-06-2026 आरभ्य 03.07.2026 पर्यन्तम्**



| दिनाङ्कः | वासरः | प्रातः उत्सवः | रात्रौ उत्सवः |
|---|---|---|---|
| 24-06-2026 | सौम्यवासरः | — | अङ्कुरार्पणम् |
| 25-06-2026 | बृहस्पतिवासरः | तिरुच्चि उत्सवः ध्वजारोहणम् | महाशेषवाहनम् |
| 26-06-2026 | भृगुवासरः | लघुशेषवाहनम् | हंसवाहनम् |
| 27-06-2026 | मन्दवासरः | सिंहवाहनम् | मौक्तिकवाहनम् |
| 28-06-2026 | भानुवासरः | कल्पवृक्षवाहनम् | सर्वभूपालवाहनम् |
| 29-06-2026 | इन्दुवासरः | आन्दोलिकायां मोहिन्यवतारोत्सवः | गरुडवाहनम् |
| 30-06-2026 | भौम्यवासरः | हनुमद्वाहनम्, सायं - वसन्तोत्सवः | गजवाहनम् |
| 01-07-2026 | सौम्यवासरः | सूर्यप्रभावाहनम् | चन्द्रप्रभावाहनम् |
| 02-07-2026 | बृहस्पतिवासरः | रथोत्सवः | अश्ववाहनम् |
| 03-07-2026 | भृगुवासरः | चक्रस्नानम् | ध्वजावरोहणम् |

# गीतामृतम्



श्रीभगवानुवाच -

न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत्।
कार्यते ह्यवशः कर्म सर्वः पप्रकृतिजैर्गुणैः।।

कर्मेन्द्रियठाणि संयम्य यः आस्ते मनसठा सस्मरन्।
इन्द्रियार्थान् विमूढात्मा मिथ्याचारस्स उच्यते।।

(भगवद्गीता ३.५,६.)

५. भावः - यः कोऽपि यदापि क्षणकालमपि कमीचरणेन विना न भविष्यति सर्वः प्रकृतिजन्य प्रभावात् सत्त्वरजस्तमोगुणैः अस्वतन्त्रः तद्वशीभूतः कर्माण्यायरत्यव।

विशेषांशः - निष्क्रियायुतै मन्दैः देहेन फलापेक्षारहित सत्कर्मणाचरणा भावेऽपि अन्तः करणे संस्कारवासना स्थितिपर्यन्तं तेषां मनः प्रपञ्चे सञ्चरत्येव।

६. भावः - मूढबुद्धिमान् कर्मेन्द्रियाणि ज्ञानेन्द्रियाणि संयम्य शमयित्वा इन्द्रियविषयान् मनसा स्मरति चेत् सः वञ्चकः इति कथ्यते।

विशेषांशः - बाह्याभ्यराभ्यां द्वाभ्यां शुद्धेन भवितव्यम्। तदैव निष्कलङ्कः भवति। तादृश निर्मलात्मा एव शुद्धात्मानं परमात्मानं पश्येत्।

## सङ्कीर्तनम्



कन्दर्पजनक गरुडगमन
नन्दगोपात्मज नमो नमो
वारिधिशयन वामन श्रीधर
नारसिंह कृष्ण नमो नमो
नीरजनाभ निगमगोचर
नारायण हरि नमो नमो
परमपुरुष भवविमोचन
वरदवसुधावधूवर
करुणाकान्त कालिन्दीरमण
नरसख शौरी नमो नमो
दानवदमन दामोदर शशि
भानुनयन बलभद्रानुज
दीनरक्षक श्रीतिरुवेङ्कटेश
नानागुणमय नमो नमो।

(अन्नमाचार्य आध्यात्मक सङ्कीर्तनम् - ४१)

# पुष्पकैङ्कर्यकर्तारः भक्ताः

१. अहिंसा प्रथमं पुष्पं पुष्पमिन्द्रियनिग्रहः
सर्वभूतदयापुष्पं क्षमापुष्पं विशेषतः॥
२. शान्तिपुष्पं तपः पुष्पं ध्यानपुष्पं
सत्यमष्टविधं पुष्पं विष्णोः प्रीतिकरं भवेत्॥

वृक्षेषु लतासु जयमानविकसत्पुष्पेभ्यः अपि अहिंसा, इन्द्रियनिग्रहः, सर्वजीवकारुण्यं, क्षमा, शान्तिः तपः, ध्यानं सत्यमित्यष्टविधगुणपुष्पाण्येव श्रीमन्नारायणहृदयं आनन्दयन्तीति अयं श्लोकः उपदिशति।

श्रीमन्नारायणः समस्त कल्याणगुणैः अलङ्कृतः, प्रकाशते। प्रेमदयादिसर्वसद्गुणाः, तस्मिन् पूर्णतया वर्तन्ते। तद्गुणसौन्दर्यमेव अस्माकं हृदयान् आकर्षति। श्रीरामबाणाहतः भूमौ पतितः वालिरपि श्रीरामं दृष्ट्वा आश्चर्यचकित अद्भुतरूपमिदमिति प्रकटीचकारेति रामायणकथावचनम्। तादृशदिव्यसुन्दरमूर्तिं सुगुन्धभरित पुष्पैः अलङ्करणं, अर्चनमनादिकालादारभ्य भारतीयसंस्कृतौ वर्तते।

भगवद्गीतायां श्रीकृष्णः ''ऋतूनां कुसुमाकरः'' वसन्तर्तुरहमेवेति प्रोवाच। अतः पुष्पाणि भगवतः अत्यन्तप्रियाणीति अस्माभिः सर्वैः ज्ञातव्यम्।श्रीकृष्णस्य परमभक्तः अक्रूरः कंसाज्ञया गोकुलमागत्य श्रीकृष्णबलरामौ मधुरां नेतुं आगतः सन् श्रीकृष्ण दर्शनंप्राप्य सुगन्ध भरितपुष्पैः पूजयित्वा वन्दनं चकारेति भागवतवचनम्। रुक्मिणीदेवी नारदद्वारा आत्मना लब्धपारिजातपुष्पाणि श्रीकृष्णाय समर्पयामास। तद्दृष्ट्वा सत्यभामापि पारिजातपुष्पाणि ममापिदेयानीति कृष्णमपृच्छत्। तदा कृष्णः देवलोकं गत्वा पारिजातवृक्षमेव आनीय द्वारकायां भूमौ निवेशयामासेति भागवतपुराण कथा। श्रीविल्लिपुत्तूरु नगरे पेरियाल्वारु प्रत्यहं वटपत्रशायिने पुष्पमालाः समर्पयति स्म। तस्य तनया आण्डालू ताः पुष्पमालाः आदौ स्वयं धृत्वा पश्चात् भगवते प्रेषयति स्म। अतः तस्याः चूडिक्कोडुत्तनाच्चियारु इति अपूर्वनाम आगतम्।

श्रीरङ्गनाथस्य विप्रनारायणः नाम तोण्डरप्पोडियाल्वारु इति महाभक्तः प्रत्यहं पुष्पकैङ्कर्यं करोति स्मेति तस्य महाभक्तिः अस्माभिः स्मरणीया। नम्माल्वारु स्वपाशुरेषु, श्रीवेङ्कटेश्वरस्य नित्यसूरिणः अपि पुष्पैः सेवन्तेस्मेति उट्टङ्कितवान्। अस्य पाशुरस्य व्याख्यानसमये श्रीरामानुजाचार्यः स्वशिष्यान् दृष्ट्वा ''तिरुमलक्षेत्रे श्रीनिवासाय पुष्पकैङ्कर्यं कर्तुं युष्मासु के संसिद्धाः भवन्तीति अपृच्छत्। तदा अनन्ताल्वारु आदौ पुरतः आगत्य तत्सेवां स्वीचकारेति गुरुपरम्परोक्तिः।

स्वाचार्याज्ञं शिरसाधृत्वा अनन्ताल्वान् तिरुमलक्षेत्रे एकं तटाकं खननंकृत्वा निर्मीय तत्समीपे सुन्दरानन्दनवनमपि निर्ममे। तत्र उद्याने विकसितपुष्पाणि प्रत्यहं श्रीवेङ्कटेश्वरस्वामिने समर्पयन् अमेयसेवां करोति स्म। ९०० संवत्सरेभ्यः पूर्वं प्रारब्धं इदं पुष्पसेवाकैङ्कर्यं अद्यापि अनन्ताल्वान्वंशपारम्पर्यत्वेन प्रवर्तते। प्रातः, सायं समये प्रवर्तमान तोमालासेवायै अन्यसेवाभ्यश्च अनन्ताल्वान् वंशास्थाः एव पुष्पमालाः समर्पयन्तीति चारित्रककथनम्। वयमपि यावच्छक्ति भगवते पुष्पकैङ्कर्यं कृत्वा तदनुग्रहात् परमानन्दजीवितं प्राप्स्यामः।

*वेङ्कटाद्रिसमं स्थानं*
*ब्रह्माण्डे नास्ति किञ्चन ।*
*वेङ्कटेशसमो देवो*
*न भूतो न भविष्यति ॥*


तिरुमलतिरुपतिदेवस्थानम्

# सप्तगिरिः

आध्यात्मिकसचित्रमासपत्रिका

स्वस्तिश्री चान्द्रमानश्रीपराभवनामसंवत्सर अधिकज्येष्ठबहुलप्रतिपत्ति सोमवारादारभ्य-
निजज्येष्ठबहुलप्रतिपत्ति-मङ्गवारपर्यन्तम् - २०२६

## जून् - २०२६

सम्पुटिः-१३ सञ्चिका-०३



| | |
|---|---|
| तिरुपति गोविन्दराजस्वामिभ्यः ब्रह्मोत्सवः<br>- डा. पि.माधवी | 06 |
| जनन्या तत्त्वोपदेशः सन्ततेःजननादेव कर्तव्यः<br>- डा. एन्.गुणवती | 09 |
| सारङ्गपाणेः आध्यात्मिक भक्तिः<br>- डा. के.कोटेश्वरय्य | 15 |
| आचार्यः नाथमुनिः<br>- डा.वि.माधवरेड्डि | 17 |
| कार्वेटिनगरम् श्रीवेणुगोपालस्वामि ब्रह्मोत्सवः<br>- आचार्य जि.पद्मनाभम् | 18 |
| परमपुरुषस्य पल्लाण्डुपाशुरगाथा (चित्रकथा)<br>- डा. के.सूर्यनारायणरेड्डि | 20 |
| द्वादशराशीनां फलानि<br>- आचार्य वेदान्तं श्रीविष्णुभट्टाचार्यः | 22 |


मुखचित्रम् - उभयदेवीभ्यां सह श्रीप्रसन्नवेङ्कटेश्वरस्वामिनः, अप्पलायगुण्ट।
अन्तिमपुटचित्रम्ः- श्री पद्मावतीदेव्याः प्लवोत्सवः।





गौरवसम्पादकः-
श्री मुद्दाड.रविचन्द्र, I.A.S.,
कार्यनिर्वहणाधिकारी,
ति.ति.देवस्थानानि।

प्रकाशकः -

सम्पादकः, प्रधानसम्पादकः( F.A.C.)
डा।। वि.जि.चोक्कलिङ्गम्, M.A., Ph.D., P.G.Dip in JMC

मुद्रापकः -

श्री आर्.वी.विजयकुमार् B.A.,B.Ed.,
उपकार्यनिर्वहणाधिकारी
मुद्रणालय - पुस्तकविक्रयक्रेन्द्रम्
ति.ति.देवस्थानम्, तिरुपति

मुख्यछायाचित्रग्राहकः -
श्री पि.एन्.शेखरः,
छायाचित्रग्राहकः, ति.ति.दे.
श्री बि.वेङ्कटरमणः,
सहायक-छायाचित्रग्राहकः,
ति.ति.दे.



सूचना
मुद्रितलेखानां विचाराः लेखकानामेव।
एतद्विषये अस्माकं दायित्वं नास्ति।
*— प्रधानसम्पादकः*



## सङ्केतः


प्रधानसम्पादकः,
सप्तगिरिः, ति.ति.देवस्थानानि
तिरुपतिः - ५१७ ५०७.

दूरभाषा - ०८७७ - २२६४५४३, २२६४३५९
प्रधानसम्पादकः,
०८७७ - २२६४३६३

सूचनानाम्, आक्षेपाणां च कृते
सम्पर्कं कुर्वन्तु -
sapthagiri_helpdesk@tirumala.org



एका पत्रिका : रू.२०/-
वार्षिकग्राहकत्वम् रू.२४०/-
आजीविक ग्राहकत्वम् रू.२४००/-



(मे मासे १९ पुटात्)

# तिरुपति गोविन्दराजस्वामिभ्यः ब्रह्मोत्सवः

- डा. पि.माधवी
चरवाणी - ८५११९८०४७८४

**वाहनवैशिष्ट्यम् -** हंसारूढभगवत्सेवया, क्षीरस्थजलं पृथक्कृत्य क्षीरमात्रपायिनः हंसः इव अस्मत्पापानि क्षमित्वा परमात्मा लेशमात्रपुण्यमेव गृहीत्वा अस्मान् तारयिष्यतीति सन्देशं ददाति। हंसवाहनं ब्रह्मणः प्रतिरूपम्। तस्य वाक्शक्तिरेव शारदादेवी। तस्याः हस्ते वेदाः भवन्ति। गोविन्दराजस्वामिनः शारदादेवीरूपे हंसवाहनस्थः भक्तेभ्यः दर्शनभाग्यं ददाति। क्षीराज्जलं पृथक्करणसामर्थ्यवति हंसवाहने विद्यमानः असतः सत् पृथक्करणीयः इति सन्देशेन स्वामिनः शारदा रूपे भक्तेभ्यः दर्शनं ददाति। तृतीयदिने श्रीपतेः हंसवाहनं उदये ७ आरभ्य ८.३० पर्यन्तं महावीथ्युत्सवः वैभवोपेततया प्रवर्तते।

**वाहनवैशिष्ट्यम् -** मृगाणाञ्च मृगेन्द्रोहं इत्युक्तरीत्या तेजोंशः सिंहे वर्तते इति इदं वाहनं सूचयति। गीतावचनस्मरणे विष्णुमूर्तेः हरिरिति पदंवर्तते। हरौ हरिः उपविशति। शक्तिसङ्केत सिंहवाहने स्वामिनां शोभा भक्तेभ्यः नेत्रानन्दं ददति। तृतीयदिनब्रह्मोत्सवं पुरस्कृत्य ऊञ्जल् सेवा उभयदेव्योः प्रवर्तते।

**मौक्तिकपन्दरि वाहनम् -** इदं वाहनं स्वामिने रात्रौ ९ आरभ्य ९.३० पर्यन्तं बृहद्वीथ्युत्सवः महावैभवोपेततया रमणीयतया प्रवर्तते।

**वाहनवैशिष्ट्यम् -** नवरत्नेषु मौक्तिकममेकम्। मौक्तिके स्वातिजलबिन्दुः पतित्वा महार्घरत्नत्वेन परिणामः सृष्टिवैभवं भगवल्लीला। एतादृशविचित्रमूल्यमौक्तिकपन्दिरिं सौन्दर्योपेततया अलङ्कृत्य तत्र श्रीपत्या परिभ्रमणकरणं सम्यग्भवतीति राजाधिराजत्वाय उचितं भवेदिति भावना पादुर्भूता। तदर्थं महावैभवोपेततया पन्दिरिं अलङ्कृत्य श्रीपतेः तत्र निवेशकरणं राजवैभवमेव।

**कल्पवृक्षवाहनम् -** चतुर्थदिने श्रीपतिः वाहनमण्टपं प्रविशति। वाहनमण्टपे अलङ्कृतकल्पवृक्षवाहने अधिष्ठितश्रीपतेः, उदये ७.३० आरभ्य ८.३० पर्यन्तं महावीथ्यां वैभवोपेततया उत्सवः पवर्तते। अन्यकार्यक्रमाःपूर्वदिनवत् निर्वाह्यन्ते।

**वाहनवैशिष्ट्यम् -** कल्पवृक्षछायार्थं देवताभिः स्वामिसन्निधौ विद्यमानत्वात् आत्मना प्रभोः आश्रयात् ममाभिलाषपूरणशक्तिः वर्तते इति देवताभ्यः कल्पतरुः उपदिशतीव वर्तते। प्रकिरत्कान्तिमद्वाहने स्वामिनिवेशः सर्वं परित्यज्य त्वमेव शरणमिति चिन्तयतां भक्तानां क्लेशान् परिहृत्य इतस्ततः अवांछितशुभान्यपि कलियुगे प्रदाता कल्पवृक्षरुपे अहमेवेति वक्तुं कल्पवृक्षवाहनं चलतीव वर्तते इति, कल्ववृक्षोनाम सर्वकामप्रददिव्यशक्तिः। अरुणोदयानन्तरं देदीप्यमानः भगवान् सूर्यः अङ्कुशतुल्यकिरणैः मृदुमधुरभगवच्छरीरस्य तापं करिष्यतीति भावनया कल्पवृक्षः स्वफलपुष्पपत्रच्छायाभिः स्वामिने सेवाभावनया भक्तिभावनया छत्रधारीव दृश्यते। सर्वकामप्रदातृकल्पवृक्षवाहनाधिष्ठितुं स्वामी करुणान्तरङ्ग नन्दस्वरूपः भवति। चतुर्थदिनसर्वभूपालवाहनमधिष्ठितुं स्वामी श्रीदेवी भूदेवी सहितः वाहनमण्टपं प्रविशति। अस्मिन्वाहने देदीप्यमानतया प्रकाशमानस्य स्वामिनः रात्रौ आरभ्य ९.३० घण्टापर्यन्तं महावीथ्युत्सवः वैभवोपेततया प्रवर्तते। अन्यकार्यक्रमाः पूर्ववत् निर्वाह्यन्ते।



धीरो हर्षशोकौ जहाति। ध्रुवं ह्यकाले मरणं न विद्यते।

**वाहनवैशिष्ट्यम् -** सर्वभूपालाः स्वामिने वाहनस्थानीयाः इति वाहनमिदं सूचयति। रात्रौ उभयदेवीभ्यां सहितः स्वामी सर्वभूपालवाहने प्रकिरत्किरणकरः इव कष्टसागरस्थभक्तानां आर्तिविनाशकोऽहं भवामीति अभयप्रदातेव वर्तते इति सूचयति। ''नाविष्णुः पृथवीपतिः'' सर्वभूपालाः नारायणांशभूताः स्वामिनं सेवन्ते इति वाहनमिदं सूचयति।

**पल्याङ्कवाहनम्** (पल्लकी -उत्सवः (मोहिन्यवतारः) पञ्चमदिने वाहनस्थमोहिनीरूपस्वामी भक्तेभ्यः पुरवीथीषु विहरन् दर्शनं प्रददाति।

**वाहनवैशिष्ट्यम् -** दुष्टशिक्षणशिष्टरक्षणार्थं क्षीरसागरे मन्थनानन्तरं अतिलोकमनोहरस्त्रीरूपं धृत्वा सुरेभ्यः सुधाप्रदातृ स्वामिनः जगन्मोहिनीरूपमिदम्। देवदानवाः तात्कालिकसन्धिं प्राप्य समुद्रमथनं चक्रिरे। क्रूरैः दानवैः अमृतकलशे अपहृते मोहिन्यवतारे असुरेभ्यः सुधाभाण्डं स्वहस्तगतं कृत्वा देवताभ्यः प्रदत्तवती। तद्दिनवाहनसौन्दर्यं नयनानन्दकरम्। ततः ऊञ्जल् सेवानिर्वाह्यते। पञ्चमदिने सायंसमये गोविन्दराजस्वामिने गरुडवाहनसेवा वैभवोपेततया निर्वाह्यते।

**गरुडवाहनवैशिष्ट्यम् -** गरुत्मान् नित्यसूरी। वेदराशिः गरुत्मदधिष्ठितस्वामिश्रुतिः शिरसि विद्यमानत्वं सूचयति। वैनतेयश्च पक्षिणामिति गीतायां कृष्णोक्तिः। विनतादास्य निवारणाय अमृतमानीय गरुत्मति आकशेगच्छति सति श्रीहरिः तं वरं वृणीष्व इति हरिणा पृष्टः गरुडः अमृतपानेन विना अजरामरत्वप्राप्तिवरमयाचत। प्रत्युपकारत्वेन गरुत्मता श्रीहरिः पृष्टः स्ववाहनं भवेत्याज्ञापयामास। वेदात्मा विहगेश्वरः विष्णुदेवस्य ध्वजाधिदेवतैव। एतन्महिमातिशयात्वादेव विहगराजः श्रीहरेः सेवकः। परमात्मा स्वस्वरूपं गरुडे पश्यति। ब्रह्मोत्सवारम्भात् अङ्कुरार्पणानन्तरं ध्वजारोहणादारभ्य ध्वजावरोहणपर्यन्तं गरुत्मान् समीपे स्थित्वा स्वामिसेवाः करोति। अतएव ब्रह्मोत्सवेषु बलिपीठे नैवेद्यानि निक्षिप्य गरुत्मद्विद्यमानवस्त्रं कोडिस्तम्भोर्ध्वप्रेषणात् सकलदेवताभ्यः आह्वानप्रेषणं अनादितया अनुस्रियते। देवताभिः स्वामिसेवायां भागस्वीकरण महत्कार्यं गरुडेनप्रारभ्यते। गरुडसेवा स्वामिसेवासु अतीवमुख्यमिति भक्ताः स्वामिसेवायां भागं गृह्णन्ति।

**हनुमद्वाहनम् -** ब्रह्मोत्सवेषु षष्ठदिने श्रीपतिः उदये हनुमद्वाहनारूढः वाहनमण्टपमागच्छति। अलङ्कृतहनुमद्वाहने श्रीपतेः महवीथ्युत्सवः ७.०० आरभ्य ८.३० पर्यन्तं रमणीयतया प्रवर्तते। अन्यकार्यक्रमाः पूर्ववत् निर्वाह्यन्ते।



**वाहनवैशिष्ट्यम् -** त्रेतायुगरामः एव गोविन्दः इति भक्तेभ्यःज्ञानार्थं गतचरितं ज्ञापयितुं परमभागवततत्त्वं प्रकटीकर्तुं हनुमद्वाहनोत्सवः उपयुज्यते। हनुमतः रामदास्यं चिरस्मरणीयम्। वेङ्कटाद्रौ कृततपःफलतया अञ्जानायाः जातः पुत्ररत्नमयम्। हनुमद्रामभक्तिः अनुपमा। हनुमद्भुजावधिष्ठीय स्वामिनां गमनं तत्सेवादर्शनं कोटिजन्मसुकृतफलम्। भक्ताः तद्दिने स्वामिनं सेवित्वा धन्याः भवन्ति। षष्ठदिने हनुमत्सेवानन्तरं वसन्तोत्सवः निर्वाह्यते। ततः सायं समये गजवाहनोत्सवः प्रवर्तते।

वसन्तोत्सवं सायंसमये वैभवोपेततया निर्वहणानन्तरं नित्यकैङ्कर्यानन्तरं कल्याणमण्टपात् श्रीपतेः आलयप्रदक्षिणसमये आरार्तिकं ददति। तदनन्तरं वाहनमण्टपमागत्य गजवाहनालङ्कारानन्तरं गजारूढस्वामिनं महद्वीथीषु ८.०० - ९.३० मध्ये परिभ्रामयन्ति।

**वाहनवैशिष्ट्यम् -** मकरगृहीतगजरक्षणमिव शरणागतान् युष्मानपि रक्षिष्यामीति सूचना गजवाहने वर्तते। सामवेद जातं देवेन्द्रमुख्यवाहनं ऐरावतम्। गजः ऐश्वर्यस्य प्रतीकः।

**सप्तमदिने सूर्यप्रभावाहनम् -** सूर्यप्रभावाहनालङ्कृतस्वामी लोकत्रयस्य कान्तिप्रदः सूर्यः इव भक्तेभ्यः दर्शनं प्रददाति। सूर्यः एव नारायणः। अदितेः द्वादशपुत्रेषु विष्णुरेव मद्विभूति सहितसहस्राकिरणसूर्यः अहमेवेति भगवानेव वदति। द्वादशात्मादिवाकरः अदितिपुत्रः आदित्यः लोकबान्धवः विश्वचक्षुः तमोहन्ता। सूर्यः त्रिमूर्त्यात्मकः। सूर्यप्रभा सूर्यपत्नी श्वेतवर्णविशिष्टा विश्वपुरुषस्य सूर्यचन्द्रौ नयने। सूर्यो नामकान्तिप्रदाता।

सप्तमदिनसायं समये गोविन्दराजस्वामिने पुण्डरीकवल्लीमातुः डोलासेवा निर्वाह्यते।

**चन्द्रप्रभावाहनम् -** श्रीगोविन्दराजः पुण्डरीकवल्यासह स्वसन्निध्यागमनानन्तरं तत्क्षणमेव वाहनमण्टपं प्राप्नोति। चन्द्रप्रभावाहनारूढः स्वामी रात्रौ ८.०० - ९.३० बृहद्वीथ्यां परिभ्रमति। ततः अन्यकार्यक्रमाः यथा पूर्वं प्रवर्तन्ते।

**वाहनवैशिष्ट्यम् -** स्वामी सूर्यचन्द्रयोरपि शासकः। चन्द्रः आनन्दसागरोत्पन्नः मोक्षलक्ष्मी सहोदरः नवग्रहेषु एकः बुधस्य पिता। बृहस्पतिभार्यायाः बुधोत्पत्तिः। मनसः कारकः चन्द्रः। “ज्ञानमात्मनिभा सूर्ये चन्द्रज्योत्स्ना” आत्मनि ज्ञानं सूर्येकान्तः चन्द्रे चन्द्रिका। चन्द्रप्रभारूप स्वामी मनसः विश्रान्तिं ददाति। “चन्द्रमा मनसोजातः” द्विजराजः ओषधीशः स्वामिनः वाहनभाग्यं प्राप्तः। तस्मात् प्रसन्नः स्वामी अस्माकं मनः प्रसन्नं करोति। सप्तमदिनसायंसमये रथोत्सवस्य स्वर्णच्छत्रं समर्प्यते।

**रथोत्सवः -** अष्टमदिने रथोत्सवः अत्यन्तवैभवोपेततया निर्वाह्यते। रथोत्सवसमये शताधिकभक्ताः भक्तिप्रपत्तिभ्यां रथरज्जुं धृत्वा स्वामिनः रथं आकर्षणेन चालयन्तः गोविन्द, गोविन्देति त्रिकरणशुद्ध्या स्वामिनामस्मरणं कुर्वन्तः स्वावांछितफलसिद्ध्यर्थं कर्पूर नीराजनं दत्वा लवणादीनि रथे विकिरन्तः शुभार्थं स्वामिनं प्रार्थयन्ते।

**रथोत्सववैशिष्ट्यम् -** इहपरप्राप्तिप्रदानोत्सवेषु समामान्यप्रजायाः अपि भागस्वाम्यं वर्तते। रथोत्सवे अवभृथोत्सवात् पूर्वदिने प्रातःकाले शुभलग्ने उभयदेवीभ्यां सहितः रथारूढः बृहद्वीथ्यां स्वामी परिभ्रमति। जीवात्मा एव रथारूढस्वामी, देहः एव रथः, बुद्धिरेव सारथिः मनः एव रज्जुः। एवं देहरथं इन्द्रियाश्वाः चालयन्ति। विज्ञानयुता बुद्धिः अश्वान् वशीकृत्य (मनः निग्रहं कृत्वा) दुःखमार्गं परित्यज्य (संसारसागरं) देहरथं सर्वव्यापहकं अतीन्द्रियं विष्णुस्थानं (गम्यस्थानं) प्रापयति। एतदुपनिषद्रहस्यबोधनमेव रथोत्सवमुख्योद्देश्यम्। श्रीहरिः अस्मच्छरीरे वर्तते इति निश्चयस्थितिं प्राप्तव्यक्तेः पुनर्जन्म नास्तीति अत्रस्थरहस्यम्। प्रजानीकः अस्मद्बलादेव रथः चलतीति भावयन्ति। सहजमानसिक प्रवृत्तेः एकमिदमुदाहरणम्।

**ऊञ्जलूसेवान्तरार्थः -** चतुर्दिक्षु चतुर्भिः रज्जुभिः डोलां लम्बमानांकृत्वा तत्र श्रीपतिं निवेश्य डोलां चालयन्ति, वेदगानेन स्वामिसेवा एव डोलोत्सवः। चत्वारः रज्जवः चतुर्वेदप्रतीकाः डोलास्थ मृदुलशय्या पुराणेतिहासाः वेदानुसरिणः एव। डोलायाः पुरः, पार्श्वदिकूचलनं पूर्वमेकंजन्म, आगामि एव जन्म भवतीति जन्मराहित्याय वेदश्रृंखलाबद्ध पुराणपुरुषः अवश्यं सेव्यः इति डोला मनसः प्रतीकेति “चञ्चलं हिमनः कृष्ण” इति कथनात् मनः संयम्य मनोमध्यस्थेश्वरः प्रतिष्ठितव्यः इति डोलोत्सवसारांशः।

(अनुवर्तते १०)



न कमलाकरं वर्जयित्वा राजहंसः अन्यत्राभिरमते।



- डा.यन्.गुणवती, चरवाणी - ८९१९६२०२२६

# जनन्या तत्त्वोपदेशः सन्ततेः जननादेव कर्तव्यः

पुरा कदाचित् धर्मप्रभुनामकः राजा आसीत्। सः जनरञ्जकतया प्रजाः पालयन् दैवभक्तितत्परः आसीत्। राजकार्यसमयानन्तरं शेषं कालं सत्सङ्गेन महर्षिमार्गे गच्छन् तत्बोधान् स्वयमाचरन् ब्रह्मज्ञानजिज्ञसया विद्यमानः अन्ते पूर्णाभिलाषः ब्रह्मज्ञानी बभूव। ज्ञानवृद्धस्य अस्य सकाशं ज्ञानपिपासवः आगत्य ज्ञानोदयं प्राप्नुवन्ति स्म। अस्य पुत्री मदालसा ज्ञानरत्ना सती पितरमेव गुरुं सम्भाव्य ज्ञानभिक्षां प्राप्य पूर्णमनोविकासमवाप।

एवं गच्छति काले लोकाचारमनुसृत्य समीपदेशराज्ञा तस्याः ऋतुध्वजेन विवाहः संवृत्तः। इयं जनिष्यत्सन्ततेः स्वेच्छानुसारं पोषयितुं एकैकाभिलाषत्वेन भर्तुरनुमतिं प्राप्तवती। आदौ मदालसायाः पुत्रः आजायत। राजा तस्य विक्रान्तः इति नामकरणञ्चकार। तन्नामश्रुत्वा मदालसा हासमभिव्यक्तीचकार। तस्यः हासस्य कारणमपृष्ट्वा विभ्रान्तः एव आसीत्।

मदलसा तस्य बालकस्य क्षीरप्रदानसमये एकान्ते वा वेदान्ततत्त्वबोधमेव करोति स्म। क्षीरपायी सः मातुः ब्रह्मज्ञानमेव श्रुणोति स्म। रोदनसमये सा पुत्रमुद्दिश्य त्वं निरञ्जनः, मा रुद ''न त्वमयं देहः केवलं वस्त्रमेव। मातरः बन्धुमित्रादयः न स्वकीयाः। बान्धव्यं भ्रमजनकमेव। ब्रह्मानन्दः एव नित्यः शाश्वतः। तं प्राप्तुमेव त्वं जातोऽसीति वदन्ती पुत्रं लालयति स्म। एवं ज्ञानमाता मादलसा बाल्यादेव सुखदुःखविचारणेन विना लोकवाञ्छाननुरक्तपुत्रं नित्यनिरञ्जनस्वरूपं चकार। सर्वमातारः एतादृशाः यदि स्युः आशापाशबन्धरहिताः सुखदुःखसमत्वं प्राप्य सर्वे मनोबलविशिष्टाः भवेयुः। विक्रान्तः एवं प्रवृद्धः वेदान्तशिरोमणिः सन् आत्मज्ञानसमुपार्जनार्थं बाल्ये एव सर्वं परित्यज्य सन्न्यस्य अटवीं गत्वा ब्रह्मज्ञानी बभूव।

ततः मदालसा द्वितीयं पुत्रं प्रसूतवती। अस्य द्वितीय पुत्रस्य राजा सुबाहुरिति नाम चकार। अद्यापि तन्नामश्रुत्वा मदालसा जहास। राज्ञा मदालसायाः परिहासहेतुः नावगतः। द्वितीयपुत्रमपि मदालसा प्रथमपुत्रमिव वर्धयति स्म। अस्मिन्नपि मातृबोधात् ज्ञानमुद्रा मनसि विकसिता। सः युक्तेवयसि सन्न्यस्य ज्ञानी सन् तपसे अटवीञ्जगाम।

मदालसायाः जातस्य तृतीयपुत्रस्य राजा शत्रुमर्दनः इति नाम चकार। मदालसा एतन्नामापिश्रुत्वा जहास। एनमपि प्रथमद्वितीपुत्रवत् आत्मस्वरूपतत्त्वज्ञं क्षीरपानेन सह चकार। अयं बालोऽपि सोदरवत् ब्रह्मज्ञानी बभूव। एवं त्रयः पुत्राः अपि सन्न्यासदीक्षिां स्वीकृत्य ज्ञानिनः भूत्वा आत्मसाक्षात्कारं प्रापुः। त्रयः पुत्राः लौकिकसुखविरक्ताः सन्न्यासिनः बभूवुरिति राजा चिन्ताक्रान्तः आसीत्। पुत्राः राज्यपालनासमर्थाः

न कालमपक्षते स्नेहः, स्वभावे वर्तते लोकः तस्य कालः परायणम्।

जाताः इति तस्य मनोवेदना तीव्रा बभूव। पुत्रान् राज्याभिषिक्तान् कृत्वा राज्यभारं परित्यज्य मदालसया सह वानप्रस्थाश्रमगमनाभिलाषः राज्ञः न परिपूर्णः बभूव।

एवं गच्छति काले मदालसायाः चतुर्थः पुत्रः अजायत। राजा स्वेन नामकरणे कृते सति मदालसा हसतीति तामेव पुत्रनामकरणं कर्तुं अपृच्छत्। तदा सा पुत्रस्य "अलर्कः" इति नामकरणश्चकार। अलर्को नाम उन्मादशुनकः। राजा एतच्छ्रुत्वा निश्चेष्टः सन् इदं नाम अनुचितमित्यवोचत्। तदा मदालसा प्रशान्तवदनेन ज्ञानदीप्त्या राजानं पश्यन्ती एवमवोचत् - राजन् एतावत्पर्यन्तं त्वत्कृतपुत्रत्रयस्य नामकरणं समुचितं वा इति वदन्ती एवं पुनरुवाच - विक्रान्तो नाम एकस्मात्प्रदेशादन्यत्र गामी। आत्मा, सर्वान्तर्यामी किल। एकस्मात् प्रदेशात् अन्यत्र कथं गमिष्यति? सुबाहुः नाम बलिष्टबाहुमान् किल। आत्मनः रूपमेव नास्ति। कथं बाहवः? तृतीय पुत्रः शत्रुमर्दनः इति नाम चेत् सर्वत्र व्याप्तस्य आत्मनः सर्वे मित्राण्येव, शत्रवः सन्ति वा? लोकाचारप्रकारं यत्किमपि नाम कुर्मः। तत्र सामञ्जस्यं नास्ति। आह्वानाय नाम यद्वा भवतु। सम्बन्धरहितनामकरणे को दोषः इति मदालसा समादधौ। राजा मदालसा वाक्सारांशं ज्ञात्वा अङ्गीचकार। परन्तु ततः चतुर्थपुत्रः यदि जनिष्यति तं राजविद्यानिष्णातं कुरु इत्युपृच्छत् मदालसा चतुर्थमुत्तमराजनीति विद्यापारङ्गतं कर्तुं मङ्गीचकार। चतुर्थपुत्रजननान्तरं मदालसा निवृत्तिमार्गं परित्यज्य प्रवृत्तिमार्गमेव बोधयतिस्म। तथापि आन्तरङ्गिकतया तस्यापि आत्मज्ञानमपि बोधयतिस्म। अनतिकाले एव बुद्धिमानलर्कः सकलकलाविशारदः बभूव। राजा युक्ते वयसि पुत्रं पट्टाबिषिक्तं कृत्वा वानप्रस्थाश्रमं गन्तुमैच्छत्। माता कुमारमेकान्ते एवमवोचत् - कुमार! लोके, बन्धाः सहजाः। बन्धेभ्यः क्लेशाः आगच्छन्ति। तीव्रक्लेशेषु प्राप्तेषु त्वदङ्गुलीस्थपत्रं उद्घटय्य पठ! सर्वमवगतं भविष्यतीत्युक्त्वा आशीः प्रयुज्य भर्त्रा सह अटवीञ्जगाम।

अलर्कः राज्यं प्रजारञ्जकत्रया पालयति स्म। क्रमशः लोकचिन्ताविदूरः परलोकध्याननिमग्नः विषयसुखविरक्तः बभूव। रज्यसुखेषु असह्यभावना अजायत। ततः मातृदत्ताङ्गुलीयकं संस्मृत्य पत्रस्य ज्ञानपेटिकामदूघाटयासमा। अज्ञानान्धकारविनाशात् प्राप्तज्ञानोदयः पत्रमपठत्। तत्र "त्वं निरञ्जनः" इति वाक्यं ज्ञात्वा वेदान्ते परिपक्वदशां प्राप्य विषयवांछारहितः राज्यं परित्यज्य अटवीं ज्ञात्वा ब्रह्मज्ञानी अहं निरञ्जनः इति बोधात् अन्ते मोक्षमवाप।

अतः मात्रा बाल्यावस्थायां सन्ततेः परब्रह्मतत्त्वबोधे कृते, ते अनर्घज्ञानरत्नानि भविष्यन्तीति मार्कण्डेय पुराणकथा सत्यमेव किल।

(८ पुटतः)

## तिरुपति
## गोविन्दराजस्वामिभ्यः ब्रह्मोत्सवः

**अश्ववाहनम् -** अष्टमदिने सायंसमये अश्ववाहने स्वामी विहरति।


**वाहनवैशिष्ट्यम् -** सेनाचतुरङ्गेषु अश्वः एकः। इहपरलोके सर्वलोकेषु सर्वदेशानां अधिपतिरहमेवेति स्वसार्वभौमत्वमनुगृहीतमिति रसवत्तररहस्यार्थलक्षणमेव अश्वोत्सवः। अश्वः वेगेन प्रकाशते। राजलांछनेषु अश्वजातेः प्रामुख्यम्। अश्वपतेः कुवलयाश्व सप्ताश्वादि सूर्यनामधेयानि अश्वप्रामुख्यं द्योतयन्ति।

नवमदिने पल्लकी उत्सवः (पल्याङ्कोत्सवः) - स्वामिनं प्रातःकाले सुप्रभातसेवायां जागृतं कृत्वा क्रमशः तोमालसेवा, अर्चनम्। प्रथमघण्टा, बलिः शात्तुमोरा, तदनन्तरं पल्याङ्कोत्सवः वैभवोपेततया निर्वाह्यन्ते। ततः चक्रस्नानं तिरुच्चि- उत्सवः ततः ध्वजावरोहणं पूर्णकुम्भप्रोक्षणं, अर्चकबहुमानमिति कार्यक्रमाः निर्वाह्यन्ते।

**ब्रह्मोत्सवफलम् -** ब्रह्मोत्सवेषु गोविन्दराजस्वामिदर्शनात् पुण्यं, ब्रह्मलोकप्राप्तिः। कार्यान्तरैः अनागतेभ्यः एकपदगमनेनापि स्वामिसन्निधिप्राप्तिफलं लभ्यते। अन्नदानात् सप्ततरेभ्यः अन्नं लभ्यते। जनुषान्धपङ्गुमूकविकलाङ्गेभ्यः वस्त्रसुवर्णदानं सकलसम्पत्तिसिद्धिप्रदम्। अत्र शाश्वतनिवासिनां सत्सन्तानसम्पत्तिसिद्धिः भवेत्। यथाशक्ति अत्र भागस्वामिनां पापक्षयात् दशतरपूर्वीकानां दशतरपश्चात्तनजातानां विष्णु प्रदप्राप्तिः भवेत्। ग्रामवासिनः सर्वव्याधिविमुक्ताः प्रजावृद्धियुताः स्युः।



न केवलं यो महतोऽपभाषते श्रृणोति तस्मादपि यः सः पापभाक्।



# तिरुमल

## श्रीस्वामिनः ज्येष्ठाभिषेकमहोत्सवः

(जून् 26 तः 28 पर्यन्तम्)

## 'वज्रकवचे'

## श्रीमल्लयप्पस्वामी








'मौक्तिककवचे'

श्रीमल्लयप्पस्वामी















‘स्वर्णकवचे’

श्रीमल्लयप्पस्वामिनः





2026 एप्रेल् 25,26,27 तिथिषु तिरुमलनारायणगिरि उद्यानवनेषु वैभवोपेततया प्रवर्तित श्रीपद्मावतीपरिण्योत्सवसन्दर्भे ति.ति.देवस्थानकार्यनिर्वहणाधिकारी श्रीमुद्दाड रविचन्द्र ऐ.ए.यस्., महोदयः, ति.ति. देवस्थान -अनुबन्धकार्यनिर्वहणाधिकारी श्री सि.हेच्. वेङ्कय्यचौदरि ऐ.आर्.यस्., महोदयः, अन्ये अधिकारिणश्च भागं गृहीतवन्तः। एतेषां दृश्यम्।




2026 एप्रेल् 23 तिथौ तिरुपति श्रीकोदण्डरामस्वामिभ्यः वैभवोपेततया प्रवर्तित पुष्पयागमहोत्सवः।



2026 एप्रेल् 25 तिथौ ओण्टिमिट्ट - श्रीकोदण्डरामस्वाम्यालये प्रवर्तित सीताजयन्त्यत्सव दृश्यम्।



2026 एप्रेल् 25 तिथौ तिरुमल-श्रीवेङ्कटेश्वरस्वाम्यालये भाष्यकारेभ्यः निर्वाहित गन्धचूर्णोत्सव दृश्यम्।




2026 एप्रेल 28 तिथौ श्रीवेङ्कटेश्वरस्वामिनः दर्शनभाग्यं प्राप्तेभ्यः भारतोपराष्ट्रपति गौरवनीय श्री सि.पि.राधाकृष्णन् महोदयेभ्यः स्वामिनः चित्रपट प्रदत्तवत्तः आन्ध्रप्रदेश-राष्ट्रदेवादायशाखमात्यः श्री आनं रामनारायणरेड्डि महोदयः। टि.टि.डि. पालकमण्डल्यध्यक्षः श्री बि.आर.नायुडुमहोदयः, कार्यनिर्वहणाधिकारी श्री मुद्दाड रविचन्द्र ऐ.ए.यस्., महोदयः, अनुबन्धकार्यनिर्वहणाधिकारी श्री सि.हेच्. वेङ्कय्यचौदरि ऐ.आर्. यस्., महोदयः पालकमण्डलीसभ्याः अन्ये उन्नताधिकारिणश्च।

# सारङ्गपाणेः आध्यात्मिक भक्तिः

- डा.के.कोटेश्वरय्य,
चरवाणी-९९८५१२३२६२

संस्कृतवाङ्मये स्तोत्रवाङ्मयं विशालं वैविध्यभरितम्। एवमेव आन्ध्रवाङ्मये कीर्तनवाङ्मयमपि तादृशमेव। आन्ध्रभाषायां कीर्तनशाखा कृष्णमाचार्य-ताल्लपाकपदकवित्यागराजादिभिः परिवृद्धा। तदनन्तरं तात्त्विकतायां आध्यात्मिकतायाः प्राधान्यं दत्तम्। कार्वेटिनगरसंस्थानपालकमाकराजु वेङ्कटपेरुमालराजस्य आस्थानकविः पण्डितः, वैणिकः विद्याधिकारी च सारङ्गपाणिः। पेरुमालराजपुत्रस्य कार्वेटिराजस्यापि आस्थानकविः सारङ्गपाणिः। सारङ्गपाणिः तिरुपतिसमीपकार्वेटिनगरस्य वेणुगोपालस्वामिणः भक्तः। तस्य कालः १९ शताब्द्याः पूर्वार्धम्। अस्य कीर्तनानि शृङ्गारपदानि देशीयपदानि जातीयपदानि इति परिशोधकैः वर्गीकृतानि। एतद्वाग्गेयकारपदेषु तात्कालीनसामाजिकपरिस्थितिः दर्पणगतचित्रमिव दृश्यते। अस्य सर्वेषु पदेषु वेणुगोपाल इत्येतत् मकुटं भवति। आध्यात्मिकतायां आराध्यमान देवतामूर्तेः सहजतया प्राधान्यं भवति। सारङ्गपाणेः वेणुगोपालः कृष्णरूपे वेणुगोपालरूपे मनोहरः सन् ग्रामीणान् गोपालान्, गोपिकाः मुनिपत्नीः आकृष्य तान् कृष्णदासान् करोति। अत एव सारङ्गपाणिः ''कोलिचिते वेणुगोपालदेवुनि कोलवरे'' ''तलचिते विष्णुचरित्रलुतलवालनि'', ''नडचिते वेणुगोपालुनिगुडिचूडालनि, चस्ते मनोहरात्मक'' ''स्वामिरूपाणि चूडालनि चेरुते श्रीमन्नारायण सेवा चेयालि'' इत्युवाच।



आध्यात्मिकतया स्वामिने अनुष्ठीयमानाङ्गरङ्गभोगाः आलयोत्सवाः, चित्ताकर्षकाः भवन्ति। सारङ्गपाणिः ''कदलिवच्चेनुचूडरे'' इति कीर्तने गरुडवाहनारूढस्समिनं वर्णयामास। वैष्णवालयेषु गरुडोत्सवस्यैव प्रामुख्यम्। वेदोच्चारणे प्रवर्तमाने राजसु भक्त्या सेवमानेसु युवतिभिः नाट्येषु क्रियमाणेषु, छत्रचामारादिभिः गायकीमणिभिः

गीतानि गीयमानेषु दुन्दुभिध्वनिषु श्रूयमाणेषु, वन्दिमागदिभिः स्वामिनि स्तूयमाने सति गरुडोत्सवः प्रचलति। आध्यात्मिकतायां स्वामिगुणकीर्तनं प्रधानम्। इदं कीर्तनं बहुविधम्। कविना स्वामी अकिञ्चनः इव चित्रीकरणं विशिष्टम्।

१. पट्टुकोवडानिकि मञ्चं लेदट, अन्दुवल्ल पामुपै शयनिञ्चिनाडट

२.उण्ड इल्लुलेदट अन्दुके उदधिवासमट

३. तिनडानिकि तिण्डिलेदट अन्दुके कुचेलुनि अटुकुलकु चेयिसाचाडट

४. पट्टबाणालुलेवट कनुकने गरिकनुचे पट्टाडट

अकारणस्य कारणत्वकल्पनं अलङ्कारशास्त्र सम्प्रदायः इति एषु पदेषु सन्दृश्यते।

सारङ्गपाणेः भक्तौ, भक्तिविभेदेषु गौरवं वर्तते। अस्य कीर्तनेषु एकम् ''भक्तिलेनि पूजलेमिटिकि'' एतद्भावनायै सारङ्गपाणिना असंख्याकोदाहरणानि दत्तानि।

१. जीतं लेनि कोलुवेन्दुकु २. चिलुकलेनि पञ्जरमेन्दुकु ३. दातलुलेनि ऊरेन्दुकु ४. अर्थं तेलियनि चदुवुलेन्दुकु ५. माटविननिकुमारुडेन्दुलकु ६. एप्पुडू प्रतिदानिनी विमर्शिञ्चे बन्धुवुलेन्दुकु ७. आशलेनि पुट्टिल्लेन्दुकु ८. पिरिकिवाडयिन भटुनि आयुधमेल इत्येवं प्रश्नान् कविः प्रयुयोज।

अनेन नवविध भक्तिभेदेषु कविना स्मरणस्य कीर्तनस्य प्राधान्यं दत्तम्। हरिकीर्तनसेयवे इति कीर्तने कालुगालिनपिल्लला -तिरगडमेन्दुलकु'' चेडिपोये देहमुपै ममकारमेन्दुकु'' इति कीर्तने कयाचिदुक्तम्।

''आध्यात्मिकपरिणतेः वैराग्यभावना आवश्यकी'', तात्त्विकचिन्तनयामपि च भावनेयं आवश्यकी। सारङ्गपाणिः मनुष्याणां अनुभवद्वारा वैराग्यं प्राप्तव्यमिति बहूनि उदाहरणानि ददौ। पोरानि तावुलकुपोरादु, अद्देकोम्पवण्टि ईदेहमु ''कड्डुपा नीवेना धनमैतिवि इत्यादीनि। आन्ध्रवाग्गेयकाराः भक्तेः, विग्रहाराधनस्य प्राधान्यं दत्वा उत्सवाः अपि भक्तजनसम्मोदकाः इति उत्सवगीतानि जानपदशैल्यां रचितवन्तः. सारङ्गपाणिकीर्तनपदेषु एतादृशानि बहूनि वर्तन्ते।

''लालनुचुचेरु ललनलिम्पुननु'' इत्येवं लालिपाट जयमङ्गलं शुभमङ्गलं इति हारतिगेयम् एवं जागृत जागृत गेयान्यपि। गेयं सर्वं सम्बोधनात्मकम्। ''श्रीललनामणि रमणा आश्रितपोषण सुगुणाशीलाखिलमय, वेणुगोपाल! मुरलीलोला सुन्दरललितकपोला, परमात्मा श्रीवेणुगोपाला'' नीदिव्यमङ्गलमूर्तिध्यानमुभक्ति नित्यमुग कृपसेयवे'' इति कथनं एका प्रार्थना।

''हरिदासुलकु पापालण्टवु सुमी इति सारङ्गपाणेः विश्वासः। १३ शतानीक शार्ङ्गदेव सङ्गीतरत्नाकरे वाग्गेयकारलक्षणमेवमुक्तम् -

**वाङ्मातुरुच्यते गेयं धातुरित्यभिधीयते।**
**वाचं गेयञ्च कुरुते यस्सः वाग्गेयकारः।।**

सर्वज्ञसिंगभूपालमनुसृत्य भाषापरतया पञ्चविधाः। १.शब्दानुशासनज्ञानं२. अभिधानप्रवीणता ३. छन्दःप्रभेदज्ञानम् ४.अलङ्कारकौशलम् ५. भाषापरसम्पूर्णपाण्डित्यम्।

न केवलमेतानि पर्याप्तानि। एतल्लक्षणैः सह १. श्रृङ्गारादिरसाः २. विभावनुभावादिभावविशेषज्ञतया, रसभाव परिज्ञानं ३. श्राव्यगानशक्तिः ४. देशरागादिषु श्रीरामज्ञानम् ५. शीघ्रगीतानिर्माणप्रतिभा ६. बहुविधगीताच्छायानु - करणपदान्तरविदग्धता। ७. पूर्वापरविनिश्चायार्थं चित्तैकाग्रयम्। एतानि सर्वाणि लक्षणानि यस्मिन् सन्ति सः उत्तमवाग्गेयेकारः इति कथ्यते। अन्नमाचार्ये इव त्यागय्ये इव एतानिलक्षणानि सारङ्गपाणिपदकवितायामपि वर्तन्ते इति बहूनां सङ्गीतपदविदुषामभिप्रायः।


न खलु धीमतां कश्चिदविषयो नाम।

- डा वि.माधवरेड्डि
चरवाणी - ९९४८५२३२५९

# आचार्यः नाथमुनिः

आचार्यनाथमुनेः वर्षतिरुनक्षत्रं २०२६ जून् २७ तिथिः। आचार्यः नाथमुनिः क्रीश ८२३-९१७ मध्ये श्रीवैष्णव सम्प्रदाये प्रमुखवेदान्तवेत्ता। नालायिर दिव्यप्रबन्धः अनेन सम्पादितः। अस्य प्रथमनाम रङ्गनाथः। अयं परान्तनाकचोल पालनकाले जातः योगतत्त्वशास्त्ररचनाश्चकार। प्रप्रथमतया अयमेव दिव्यप्रबन्धं सङ्कलनञ्चकार। अयं योगरहस्यं न्यायतत्त्वमित्यदिग्रन्थान् व्यरचीत्। अस्य जीवनकालः ९३ वर्षावधिः। वैष्णवसम्प्रदायप्रपञ्चे प्रातःस्मरणीयाः द्वादशाल्वरुमहोदयाः, तदनन्तरं आचार्याः। तैः आस्तिकलोकाय दत्तसम्पदमूल्या। तादृशेषु आचार्येषु नाथमुनिरेकः।

ज्येष्ठमासे त्वनूराधाजातं शरजिदाश्रयं।
उद्धर्तारं प्रबन्धानां श्रीनाथमुनिं भजे॥

तमिलदेशे वीरनारायणपुरे मन्नारुराजगोपालस्वामी बहुप्रसिद्धः। तमिले मन्नारु इत्युक्ते राजाधिराजः इत्यर्थः क्षेत्रनाम्नि एव आचार्येषु नाथमुनिः अमकुटमहाराजः। एतस्मादेव महानुभावात् नालायिरं आस्तिकलोके वैष्णवप्रपञ्चस्य पुनर्लब्धम्। नाथमुनेः पिता ईश्वरभट्टः। आलयार्चकमुखानुगुणततया नाथमुनिः उत्तरभारतयात्रां गतः।



वैष्णवक्षेत्राणि बहूनि सन्दर्श्य वीरनारायणपुरे शिष्येभ्यः शास्त्रादीनि बोधयन् कालंयापयति स्म। कदाचित् मेल्नाडुप्रान्तादागतवैष्णवाः वीरनारायणं संसेव्य तिरुवायिमोलिस्थ ‘‘आरालमुदे’’ पाशुरं अनुसन्धानसमये तद्दृष्ट्वा अन्यपाशुराणि अनुसन्धानं कुर्वन्तु इत्युक्तत्वात् ते वयमेकमेव पाशुरं जानीमः। अन्यपाशुरं न जानीमः इत्युक्तवन्तः। तदा नाथमुनिः तत् कथञ्चिदपि सम्पाद्य नम्मान्वरुणा परमपदप्राप्त - स्थान - अल्वारुतिरुनगरीं जगाम। मधुरकविशिष्यः पराङ्कुशदासः तत्र मधुरकविशिष्यान् दृष्ट्वा नम्माल्वारुरचनाः अधिकृत्य प्रस्तुतिश्चकार। तदा सः एतत्पाशुरपठितारः अनुसन्धानकर्तारश्च तत्क्षणं परमपदं प्राप्ताः। तत्कारणादेव व्याप्तिः न बभूवेति अवोचन्। परन्तु युष्मभिः नम्माल्वारुशिष्यभूत मधुरकवि - अल्वारुरचितं ‘‘कण्णिनुं शिरुत्तम् ग्रन्थं द्वादश सहस्रपर्यायं अनुसन्धानं कृतश्चेत् शठगोपाः प्रसन्नाः भवेयुरिति अवोचत्। तथाकरणे तिन्त्रिणीवृक्षपुरतः कण्णनुजपमकार्षीत्। स्वामी साक्षात्कृत्य किं वांछितमित्यपृच्छत्। तदा तदभिलाषमनुसृत्य ‘‘शठगोपः’’ नालायिरं बोधयामास। तदा सः एतेषां पाशुराणां अनुसन्धानकर्तारः तत्क्षणं परमपदं प्राप्ताः इति तत्कारणादेव इयं परम्परा न व्याप्तेत्यवोचत् तथापि युष्माभिः कुतूहलात् पृच्छ्यते इति आल्वारुतिरुनगरीं गत्वा मधुरकवि - आल्वारुमहाशयेन गीतं कन्निनुं शिरुत्ताम्बुपाशरं द्वादशवर्षसहस्रपर्यन्तं अनुसन्धानं कृतश्चेत् नम्मल्वारुमहोदयः प्रत्यक्षीभविष्यतीति उपायमवोचत्। अनया सूचनया नाथमुनिः आल्वारुतिरुनगर्यां तिन्त्रिणीवृक्षस्कन्धे परोक्षरुपस्थ नम्माल्वारुमहाशयं जपन् कन्निनुं कन्निनुशिरुत्ताम्बु द्वादशवर्षपर्यायमजपत्।

(अनुवर्तते १९)





# कार्वेटिनगरम्
# श्रीवेणुगोपालस्वामि ब्रह्मोत्सवः

- आचार्य जि.पद्मनाभम्
चरवाणी -९२४७३२८२८६

कार्वेटिनगरं वेणुगोपालस्वामि ब्रह्मोत्सवाः २०२६ वर्षे जून् ६ तिथ्यारभ्य १४ तिथिपर्यन्तं ति.ति.देवस्थानाध्वर्ये निर्वहिष्यन्ते।

आन्ध्रदेशे चित्तूरु जिल्लायां पुत्तूरुतः चित्तूरु वीथीमार्गे १२ कि.मी. दूरे १५४१ संवत्सरे रचित शिलाशासने कार्वेडु इति रूपं वर्तते। पुरा कार्वेटिनगरं एकं संस्थानमिवासीत् एतत्संस्थानाधिपः सूर्यवंशीयः इत्युक्तेऽपि कार्वेडु इति गृहनामक यादवाः एतत्परिसरप्रान्ते बहवः आसन्। केचित् एतान् बलिजकुलस्थाः इति व्यवहरन्ति स्म। केचिदेतान् चोलाः इति कथयन्ति। एतेषां साम्राज्यं प्राक् कालहस्ती, पश्चिमदिशि देवलंपेटा, दक्षिणदिग्भागे तिरुवेलुगाडु, उदीचिदिशि तिरुपतिपर्यन्तं व्याप्तमासीत्। १९५५ वर्षे दिवङ्गतकुमारस्वामिराजः अस्मिन् वंशे १५० वर्षीयः। एतेषां सर्वं चरितं न जानीमः। द्विवर्षाद्व्याप्तचरितं अद्य ज्ञातुं शक्यते। एते श्रीवेङ्कटेश्वरभक्ताः। अत एव अस्य देवस्य पर्यायनामानि एतेषां नामानीव वर्तन्ते। कार्वेटिनगरराजपत्नी नामभिः ९०१ ग्रामाः सन्ति। एतेषां प्रथमराजधानी नारायणवनम्। कदाचित् मृगयार्थं गतेषु एतेषु तत्रस्थ शुनकाः शशकभीताः पलायिताः इति ज्ञात्वा अत्र राजभवननिर्माणं कृतश्चेत् सम्यग्भवेदिति तत्रस्थाटवीं विच्छिद्य नगरनिर्माणं कृतवन्तः। अतः कारवेटिनगरं क्रमशः कार्वेटिनगरनाम्ना परिणतमिति वदन्ति। केचित् काडौ मृगयां कृत्वा निर्मितं नगरमिति व्युत्पत्तिं वदन्ति। केचित् कार्वेटिनाम्नी देवता एतत्प्रान्ते आसीदिति कार्वेटिनगरनाम आगतमिति वदन्ति।

१७५०-१७६० मध्यवर्षेषु वीरकाविराजः एतत्प्रान्तं पालयति स्म। अस्य कनिष्ठसोदरः पेदवेङ्कटेपेरुमार्लाजः'' कदाचित् द्वयोः सोदरयोः मध्ये युद्धे प्रवृत्ते वीरकानिराजेन सोदरे छुरिकाप्रसारात् सा छुरिका तस्मिन् अपतित्वा अन्यत्र अपतत्। तत्प्रहारद्वारं एतावत्पर्यन्तं चिह्नमिवासीत्। अतः पेदवेङ्कटपेरुमार्लजः एतद्राज्यं परित्यज्य पुङ्गनूरु समीपे एकं व्याघ्रं हत्वा मैसूरु नगरे कञ्चन बलिष्ठाश्वं नियन्त्रितवानिति प्रजाभिः प्रस्तुतः। अग्रसोदरमरणानन्तरं सोदरोऽयं कार्वेटिनगरमागत्य राजा बभूव।

अयमेव चन्द्रशालां, नागभट्खानं राजसभां कल्याणमण्टपांश्च निर्ममे।पेदकोमराजस्य ज्येष्ठपुत्रः वेङ्कटपेरुमार्लाजः दर्पणभवनं १०एकराविस्तीर्णे (100 cents) १८६५ वर्षे निर्ममे। धातुक्षामे प्रजाभ्यः आहारार्थं कर्म परकल्प्य एतन्निर्माणमकरोत्। वेङ्कटपेरुमार्लाजः


न गृहं गृहमित्याहुः गृहिणी गृहमुच्यते।

तिरुत्तणिसुब्रह्मण्यस्वामिभक्तः। अयमेव जलाशयं निर्ममे। एतस्य नाम स्कन्दपुष्करिणीति। अस्य अगाधः सप्तगजदीधपरिमाणः। विस्तीर्ण १०(10,000 cents) एकराः। पुर्याः दक्षिणभागे उन्नप्रदेशे सुब्रह्मण्यस्वामिदेवालय निर्माणकाले अयं परमपदमवाप।

लावण्यशतककर्ता वेणुगोपालशतककर्ता पोलिपेद्दि वेङ्कट्रामय्यपदकर्ता सारङ्गपाणिः, शत्रुघ्नविजयकर्ता बालकविसुब्रह्मण्यंमहाशयः, इत्येते सर्वे कार्वेटिनगरराजास्थानकवयः एव। रुक्मिणी, सत्यभामा, गोसहितवेणुगोपालस्वाम्यालयः अतीव प्रचीनः महान् अस्याः पुर्याः निरुतिमूले वर्तते। अत्र सीतारामलक्ष्मणदेवालयोऽपि वर्तते। काशीपुण्यक्षेत्रादानीतशिवलिङ्गसहितकाशी विश्वेश्वरालयः अन्नपूर्णा - विनायकयोगसुब्रह्मण्यानां शिलाविग्रहैः सहितः वर्तते। अत्र राजभवनमहाद्वारं, वेणुगोपालस्वामिविमानं, वायुगोपुराणि, जलाशयचित्राणि दर्शनीयानि। एतेषां छायाचित्राणि पश्यन्तु।

ब्रह्मोत्सवाः - अत्र ति.ति.देवस्थानाधिपत्येन वर्षे वर्षे ब्रह्मोत्सवाः नवदिनपर्यन्तं प्रचलन्ति। रुक्मिणीसत्यभामा समेतं वेणुगोपालस्वामिनं पुरवीथीषु अङ्गरङ्गवैभवोपेततया वाहनेषु भक्तदर्शनार्थं परिभ्रामयन्ति। नववाहनसेवाः ध्वजारोहणनन्तरं लघुशेषवाहनम् बृहच्छेषवाहनम् हंसवाहनम् सिंहवाहनम् मौक्तिकपन्दिरी वाहनम्, कल्पवृक्षवाहनम्, मोहिन्यवतार पल्याङ्कवाहनम् सर्वभूपालवाहनम्, गरुडवाहनम्, हनुमद्वाहनम्, गजवाहनम्, सूर्यप्रभावाहनम्, चन्द्रप्रभावाहनम् रथोत्सवः, अश्ववाहनम् पल्लक्युत्सवः, चक्रस्नानम् तिरुच्चि-उत्सवः ध्वजावरोहणम् पूर्णकुम्भप्रोक्षणम् नवकुम्भारोपणमिति नववाहनसेवाः तिरुमलक्षेत्रे इव ब्रह्मोत्सवाः अङ्गरङ्गवैभवतया निर्वाह्यन्ते।

(१७ पुटतः)

# आचार्यः नाथमुनिः

एवं दिव्यप्रबन्धः तमिलदेशे व्याप्तः। ततः नाथमुनिः योगनिष्ठास्थः बभूव। तस्मिन् समये मृगयाविनोदी कश्चित् महापुरुषः वीरनारायणपुरमागत्य गतः इति नाथमुनिपुत्राः अवोचन्। तदा नाथमुनिः आगताः जानकीरामलक्ष्मणाः इति तद्दर्शनं नाभवदिति दुःखमग्नः आसीत्। पश्चात् भगवद्भक्त्या मुक्तिमवाप। तमिलदेशे वैष्णवं जनसामान्यप्रस्तुतिं प्राप्तुं द्वादशाल्वारुमहाशयानां पवित्रजीवितं प्रथमकारणम्। अपि च तेषां १०८ दिव्यदेशदर्शनभाग्यं वैष्णवानामनन्तरकाले अनुसरणीयमभवत्। तथापि तमिलदेशे शैवविजृम्भणात् वैष्णव मतं बहुक्लेशानवाप। वैष्णवसाहित्यप्रचारस्यापि विघ्नाः बहवः आगताः। एतादृशस्थितावपि नाथमुनेः अकुण्ठिततपः प्रभावात् नालयिरसम्पादनात् वैष्णवं क्रमशः प्रवृद्धम्। रामानुजकाले दाक्षिणात्यवैष्णवे तारास्थायिनिविद्यमानत्वात् वैष्णवाधारभूत दिव्यप्रबन्धानुसन्धानं आलयकैङ्कर्येषु भागः अभवत्। एतेषां सर्वेषां नाथमुनिप्रयत्नः एव कारणम्। नाथमुनिः वेदव्यासः इव दिव्यप्रबन्धविभागाय महान्तं परिश्रमञ्चकार। नाथमुनेः शिष्यौ "उय्यन् कोण्डारु, कुरुगैकावल् अप्पन् इति। एतौ स्वपौत्रयामुनाचार्याय बोधयितुमाज्ञापयामास। नम्माल्वारु १.तिरुविरुन्तं, २.तिरुवासिरियं, ३.पेरियतिरुवन्तादि ४. तिरुवायूमोलु इति पाशुराणि नाथमुनेः बोधयामास। मुदलायिपेरियतिरुमुलि इयर्पा, तिरुचायिमुलि इत्येतेषां पाशुराणां गानविधानपद्धतिं सम्यक् सूत्रीचकार। प्रसिद्धवैष्णवक्षेत्रेषु नाथमुनिविग्रहाः वर्तन्ते। तिरुपति नाथमुनिवीथौ नाथमुनिविग्रहः अद्यापि दृश्यते। एतेषां आधारग्रन्थः आचार्यसूक्ति मुक्तावळिः।)

नाथमुनेः दिव्यप्रबन्धसम्पादनासक्तिं ज्ञात्वा नम्माल्वारुमहाशयः चतुस्सहस्रपाशुरसङ्कलनं तस्य ददौ। एवं रहस्यत्रयं अन्तिमोपायं अष्टाङ्गयोगरहस्यं, अखिलदर्शन मुख्यतात्पार्याणि अनुगृहीतवान्। स्वल्पायुष्केभ्यः दुराचारपरेभ्यः अबोधयित्वा आसक्तियुतेभ्यः एव बोधय इति आदिदेश। तथैव स्वस्थलवीरनारायणपुरं गत्वा शिष्यसमूहस्य द्रविड वेदं बोधय इत्यादिदेश। ततः नाथमुनिः तदनुमतः (कार्पुमन्नारकोयिल्) वीरनारायणपुरंगत्वा "कीलहत्ताल्वान् मेलेहत्ताल्वान्" नामक पौत्रसाहाय्येन दिव्यप्रबन्धपारायणं प्रचारमकरोत्। नाथमुनेः प्रबन्धगानव्याप्तिं श्रुत्वा तत्प्रान्तचोलमण्डलेश्वरः तं सत्कृतञ्चकार।

चित्रकथा

# परमपुरुषस्य पल्लाण्डुपाशुरगाथा

आन्ध्रानुवादः - तुम्मपूडि कल्पना
तमिलमूलम् - वि.ओ.सुरेश्
चित्राणि - श्री के. द्वारकानाथः
संस्कृतानुवादः - डा.सूर्यनारायणरेड्डि
चरवाणी - ८१०६५७८२५०

पुरा श्रीविल्लिपुत्तूरुनगरे विद्यमानः विष्णुचित्तोनाम भक्तः स्वभवनपृष्टभागे नन्दनोद्यानं वर्धयित्वा तत्र विद्यमानवटपत्रशायिने पुष्पमालाः निर्मीय तस्मै भगवते समर्पयन् पुष्पकैङ्कर्यं करोति स्म।






नकदापि कोपः स्वजने विधेयः।




न चिरात् प्राप्यते लोके पापानां कर्मणां फलम्।

# जून् 2026 द्वादशराशीनां मासफलानि

- आचार्य वेदान्तं श्रीविष्णुभट्टाचार्यः, चरवाणी - ९४९०७४१४१४





१.मेषराशिः - विद्या-उद्योगव्यासङ्गेषु परिवर्तनं भविष्यति। पराक्रमः, यशः, आध्यात्मिकचिन्तनं, वाक्पारुष्यं, तदा तदा ज्वरपीडा, वाहनसौख्यं वृथाविषादाः, अधिकारजनद्वाराप्रशंसाः, बन्धुवैरम् सम्भविष्यन्ति। श्रीमहाविष्णोः आराधनं करणीयम्।



२.वृषभराशिः - शान्तस्वभावः, आर्थिकलाभः, शरीरे उष्णसम्बन्धदोषाः तदा तदा सम्बविष्यन्ति। उद्योगपरिवर्तनं, वाहनयोगः तीर्थयात्राभिलाषः, अधिकारजनप्रशंसाः, सम्माननं भविष्यन्ति। परमशिवाराधनं कर्तव्यम्।



३. मिथुनराशिः - मासपूर्वार्धे आत्मन्यूनता भावः, उत्तरार्धे शुभकार्याणि भविष्यति। तदा तदा ज्वरपीडा, कुटुम्बसौख्यं, धनागमः, मित्रलाभः, दैवदर्शनं, अधिकक्रोधः, चिन्तनं, कलाप्रदर्शनं उत्साहः भविष्यन्ति। सूर्यग्रहाराधनं करणीयम्।



४.कर्काटकराशि : - आरोग्यं, उत्साहः, शुभकार्येषु निमग्नता, आत्मोन्नतिः भाग्यलाभः, आध्यात्मिकविषयसंग्रहणे उल्लासः। तदा तदा शरीरस्य अस्वास्थ्यं मासान्ते भ्रातृद्वारा लाभः सम्भविष्यन्ति। शिवाराधनं करणीयम्।



५. सिंहराशिः - शरीरस्य अधिकश्रमः, कोपः। आरोग्यविषयकश्रद्धावश्यकता। भाग्यलाभः, राज्यलाभः, अधिकारजनप्रशंसाः, उद्योगपरिवर्तनं, अधिकजनव्ययः, वैराग्यं मानसिकव्यथा सम्भविष्यन्ति। शनिग्रहाराधनं कर्तव्यम्।



६. कन्याराशिः - उत्साहः, बन्धुजनसमागमः, उल्लासः, स्त्रीसौख्यं, शत्रुद्वारालाभः, विजयः, पितृचिन्ता, उद्योगलाभः, कार्यसिद्धिः, आध्यात्मिककार्यक्रमेषु श्रद्धा, ग्रन्थपठनं सन्तानलाभः अपरिष्कृतकार्याणां परिष्कारः प्रयाणलाभः भविष्यन्ति। श्रीमहाविष्णोः आराधनं कर्तव्यम्।



७. तुलाराशिः - शुभकालः, सदाचिन्तनं ,आत्मोन्नतिः, यशोवर्धनं, पितृलाभः, शुभकार्यसिद्धिः, उद्योगविषयः, आध्यात्मिकोन्नतिः, सन्तानलाभः, अपरिष्कृतकार्याणां परिष्कारः, प्रयाणलाभः, भविष्यन्ति। शिवाराधनं कर्तव्यम्।



८. वृश्चिकराशिः - कार्यविघ्नाः, मनोव्यथा, भ्रातृलाभः, मनोरथसिद्धिः, तीर्थयात्राः, ज्ञानसिद्धिः, आध्यात्मिककार्येषु, निमग्नता, अधिकारजनप्रशंसाः, दैवदर्शनं सम्भविष्यन्ति। शिवाराधनं कर्तव्यम्



९. धनूराशिः - अधिकधनव्ययः, अकालभोजनं, भूलाभः सोदरलाभः, आत्मोन्नतिः, दूरप्रयाणानि, ज्ञानसाधनेच्छा, तीर्थयात्राभिलाषः विद्योद्योगकर्मसु वैराग्यं दुःखानि च सम्भविष्यन्ति। गुरुग्रहाराधनं करणीयम्।



१०. मकरराशिः - शुभकालः, अपरिष्कृतकार्याणां संपूर्ण परिष्कारः, कुटुम्बाभिवृद्धिः, विद्याव्यासङ्गेषु नैपुण्यं, अधिकारजनप्रशंसाः, दैवदर्शनं, तीर्थयात्राः, धनागमनं, उद्योगोन्नतिः सम्भविष्यन्ति। तदा तदा वाक्पारुष्यं सम्भवष्यन्ति। राहुग्रहाराधनं कर्तव्यम्।



११. कुम्भराशिः - ज्वरपीडा, दूरदेशसञ्चारः, वृथाविवादः, धनव्ययः, उद्योगव्यापारेषु, वैराग्यं, सम्भविष्यन्त्यपि कुटुम्बभिवृद्धिः अपरिष्कृतकार्याणां परिष्कारः, भूलाभः, अधिकारजनप्रशंसाः, व्यापारभिवृद्धि सम्भवष्यन्ति। राहुग्रहाराधनं कर्तव्यम्।



१२. मीनराशिः - मनोव्यथा, शरीरश्रमः, चिन्ता वैराग्यभावना, दूरदेशसञ्चारः, सुखेषु अनासक्तता, वृथा विवादाः पराक्रमः, धनागमनं बन्धुमित्रसमागमः आध्यात्मिक जीवनेच्छा सम्भविष्यन्ति। शिवाराधनं करणीयम्।



न जातुकामः उपभोगेन शाम्यति।

Printed by Sri R.V.Vijaya Kumar, B.A.B.Ed. and Published by Dr.V.G. Chokkalingam, M.A., Ph.D., P.G.Dip in JMC on behalf of Tirumala Tirupati Devasthanams and Printed and Published at Tirumala Tirupati Devasthanams Press, K.T. Road, Tirupati-517 507. Editor: Dr.V.G. Chokkalingam, M.A., Ph.D. P.G.Dip in JMC.


तिरुपतिस्थ
श्रीगोविन्दराजस्वामिनः पुष्पयागमहोत्सवः
22.06.2026

SAPTHAGIRI (SANSKRIT) SPIRITUAL ILLUSTRATED MONTHLY PUBLISHED BY
TIRUMALA TIRUPATI DEVASTHANAMS PRINTING ON 25-05-2026 & posting at Tirupati
RMS Regd.with the Registrar of Newspapers for India under RNI No.21138/1970 Postal
Regd. No. TRP/154/2024-2026" LICENCED TO POST WITHOUT PREPAYMENT
No.PMGK/RNP/WPP-04(4)/2024-2026" Posting on 1st of every month.



# श्रीपद्मावतीदेव्याः प्लवोत्सवः

(25.06.2026 तः 29.06.2026 पर्यन्तम्)